वर्षम् - ०१ अङ्कः - ०१
जनवरी-दिसम्बर, २०१९ शोधज्योतिः
ISSN-2350-0700

# नामार्थविचारः (परमलघुमञ्जूषायाः परिप्रेक्ष्ये)

**प्रो. विनोद कुमार झा***

## प्रस्तावना

नाम अर्थात् प्रातिपदिकम्=शब्दः तस्याऽर्थविषये शास्त्रकारेषु पर्याप्तमतभेदो वर्त्तते। मीमांसका नामार्थविषये लाघवात् शब्दस्य शक्तिं जातौ स्वीकुर्वन्ति। नैयायिका जात्याकृतिविशिष्टव्यक्तौ नामार्थं स्वीकुर्वन्ति, कारणमत्र महर्षिना गौतमेन पठितं सूत्रमिदं विद्यते- **"जात्याकृतिव्यक्तयस्तु पदार्थः"** (न्यायसूत्रे- २/२/६८)। वैयाकरणैर्लक्ष्याऽनुसारं कदाचिज्जातौ[१], कदाचिद् व्यक्तौ[२] कदाचिच्च विशिष्टे अर्थात् जातिविशिष्टव्यक्तौ तथा च व्यक्तिविशिष्टजातौ नामार्थः स्वीक्रियते। परमलघुमञ्जूषायां शक्यतावच्छेदकजात्युपलक्षितव्यक्तावर्थे नामार्थरिति चर्चा विशेषेणोपलभ्यते तथा च गौणरूपेण विशिष्टे अर्थात् जातिविशिष्टव्यक्तौ व्यक्तिविशिष्टजातौ च।

## मीमांसकैर्वैयाकरणमतखण्डनं स्वमतोपस्थापनञ्च

मीमांसकाश्शब्दानां शक्तिं जातौ स्वीकुर्वन्ति न तु व्यक्तौ। व्यक्तौ शक्तिस्वीकारे मीमांसकैर्दोषद्वयं प्रस्तूयते- १. आनन्त्यदोषः २. व्यभिचारदोषश्च। आनन्त्यदोषस्य तात्पर्यं वर्त्तते - देशभेदेन कालभेदेन च व्यक्तिरनन्ता सीमारहिता च भवति। प्रत्येकस्यां व्यक्तौ शक्तिस्वीकारे आनन्त्यदोषः प्रसक्तो भवति। न च तस्य आनन्त्यदोषस्य निवारणाय नहि सर्वासु व्यक्तिषु प्रत्युत कस्याञ्चिद् एकस्यां व्यक्तौ शक्तिस्वीकारे न दोषरिति वाच्यम्, तथा सति व्यभिचारदोषस्य सत्त्वात्। कारणं यस्याम् एकस्यां व्यक्तौ शक्तिग्रहो भवति, तस्या येन शब्देन ज्ञानं क्रियते ततो भिन्नव्यक्तेर्ज्ञानं तेन शब्देन न भवेत्, किन्तु भिन्नव्यक्तेरपि ज्ञानं भवत्येव। एवम्प्रकारेण शक्तिज्ञानरूपकारणस्य अभावेऽपि बोधरूपं कार्यं भवति, तस्मादस्ति व्यभिचाररूपो दोषः। अत एव उपर्युक्तदोषद्वयस्य निवारणाय जातावेव नामार्थशक्तिः स्वीकरणीया।

---

* व्याकरणसङ्कायाध्यक्षोऽनुस्नातकभवनाध्यक्षचरः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्-३६२२६६

[१] "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"- अष्टाध्यायी, १/२/५८

[२] "सरूपाणामेकशेष एकविभक्तौ" - अष्टाध्यायी, १/२/६४

जातौ शक्तिस्वीकारेऽपि व्यक्तिं विना जातेरधिष्ठानस्याऽसम्भवाद् 'गामानय' इत्यादौ अन्वयाऽनुपपत्त्या च तदाश्रयव्यक्तेर्बोधो लक्षणाशक्त्या क्रियते। उच्यते च- **'नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते'** अर्थात् या बुद्धिर्निश्चितरूपेण विशेषणात्मिका सञ्जाता वर्तते, यया बुद्ध्या निस्सन्देहं विशेषणं गृहीतं वर्त्तते सा बुद्धिर्विशेष्यं प्रति क्षीणा भवति। उक्तञ्चापि काव्यप्रकाशे- **'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'**[३] अर्थात् अभिधाद्वारा विशेषणीभूताया जातेर्बोधकत्वेन क्षीणशक्तिकः शब्दो विशेष्यभूतां व्यक्तिं कथयितुं न पारयति। व्यक्तिस्तु लक्षणाद्वारैव उच्यते। अत्र विशेषणशब्देन जातेः तथा च विशेष्यशब्देन व्यक्तेर्ग्रहणं वर्त्तते। विशेषणज्ञानं विना विशेष्यज्ञानं न भवति, तस्माद् व्यक्तिं प्रति विशेषणीभूतायां जातौ शब्दस्य अभिधाद्वारा शक्तिस्वीकारे विशेष्यस्य व्यक्तेर्बोधो लक्षणाद्वारैव जायते।

## वैयाकरणैर्मीमांसकमतखण्डनं स्वमतोपस्थापनञ्च

अभिधावृत्त्या उपस्थितार्थेन अन्वयानुपपत्तौ लक्षणावृत्तिः स्वीक्रियते। उक्तञ्चापि- **मुख्यार्थबाधे तद्युक्तो ययाऽन्योर्थः प्रयीयते। रूढेः प्रयोजनाद् वाऽसौ लक्षणाशक्तिरर्पिता।।**[४] जातौ शब्दस्य शक्तिरभिधाद्वारा तथा च अन्वयाऽनुपपत्त्या विशेष्यस्य व्यक्तेर्बोधो लक्षणाद्वारा स्वीकारेऽपि व्यक्तिभानानापत्त्येन 'गोत्वम् अस्ति' इत्यर्थे अन्वयाऽनुपपत्त्यभावेन लक्षणास्वीकाराभावात् 'गौरस्ति' इति प्रयोगे मीमांसकमते अव्याप्तिर्वर्त्तते। अस्माकं वैयाकरणानां पक्षे व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरुपलक्षणत्वेन[५] तथा च तस्या जातेरैक्येन तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारे अनन्तशक्तिकल्पनाविरहाद् अगौरवापत्तिरेवाऽस्ति। अतः 'गङ्गायां घोषः' इत्यादिस्थले लक्षणावृत्तौ यथा लक्ष्यतावच्छेदकः तीरत्वादिकं भवति तथैव शक्यतावच्छेदकजातिर्या शक्यार्थस्य व्यक्तेः उपलक्षिका वर्तते तस्याः शक्यतावच्छेदकजातेश्शब्दार्थाऽस्वीकारेऽपि दोषाऽभावो विद्यते। **'नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते'** इत्यनुरोधेन विशेषणविशिष्टविशेष्यबोधे अर्थात् जातिविशिष्टव्यक्तौ तात्पर्येऽपि भवद्भिरुक्तायां व्यक्तेर्विशेषणीभूतायां जातौ शब्दस्य अभिधाद्वारा शक्तिः तथा च विशेष्यव्यक्तौ लक्षणाद्वारा शक्तिः स्वीकरणीयेति तात्पर्येऽस्ति प्रमाणाऽभावः। सहैव जातेरुपलक्षकत्वेन जात्याश्रयभूतसकलव्यक्तिबोधेन व्यक्त्यन्तरस्य बोधाऽप्रसङ्गोऽपि वर्तते, अतः जात्युपलक्षितव्यक्तावेव नामार्थः स्वीकरणीयः। उक्तञ्चापि तन्त्रवार्तिके-

**आनन्त्येऽपि हि भावानाम् एकं कृत्वोपलक्षणम्।**
**शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति।।**

---

[३] काव्यप्रकाशस्य द्वितीयोल्लासे दशम्याः कारिकाया वृत्तावुद्धृतमेतत्।

[४] साहित्यदर्पणे- २/९

[५] उपलक्ष्यते अनेनेति उपलक्षणम्=चिह्नम्, करणे ल्युट्।

अर्थात् **भावानाम्**=पदार्थानाम् आनन्त्येऽपि **एकं कृत्वोपलक्षणम्**=जातिमेकामुपलक्षणत्वेन स्वीकृत्य **शब्दः सुकरसम्बन्धः**=शब्दस्य वाच्यतारूपः सम्बन्धः सुग्राह्यो भविष्यति, **न च व्यभिचरिष्यति**=सर्वासु व्यक्तिषु शब्दस्य शक्तिर्विद्यते इति मननात् शब्दे व्यभिचारनामको दोषो न भविष्यति।

अस्माकं मतम् एवम्प्रकारेणापि उचितमेवाऽस्ति। यथा-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

अर्थात् शक्तिग्रहम्=शक्तिज्ञानं व्याकरणाद्, उपमानात्, कोशाद्, आप्तवाक्याद्, व्यवहाराद्, वाक्यस्य शेषाद्, विवृतेः= व्याख्यानात्, सिद्धपदस्य=प्रसिद्धपदस्य सान्निध्यतः=सामीप्याद् भवतीति वृद्धाः=विद्वांसः वदन्ति। तत्र अष्टसु शक्तिबोधकेष्वुपायेषु शिरोमणिर्व्यवहारो व्यक्तावेव शक्तिं बोधयति, लोके गवादिपदेन व्यक्तेरेव बोधात्।

वस्तुतः **'न ह्याकृतिपदार्थकस्य**[६] **द्रव्यं न पदार्थः'** इति **"सरूपाणामेकशेष एकविभक्तौ"** सूत्रस्थभाष्यानुरोधेन आकृतिपदार्थकानां विदुषां मते द्रव्यं पदार्थो न भवति एवं नास्ति, अपितु विशिष्टे पदार्थत्वं विद्यते अर्थात् जातिविशिष्टव्यक्तिराहोस्विद् व्यक्तिविशिष्टजातिः पदार्थो वर्तते। कारणं लोके शब्दप्रयोगेन तथैवाऽनुभवः क्रियते तथा च अनुभवसिद्धस्य अपलापः=असत्यप्रतिपादनम् अयोग्यो भवति।

**लिङ्गस्य नामार्थत्वम्-** जातेर्व्यक्तेश्चानन्तरं लिङ्गमपि नामार्थो विद्यते, टाबादिप्रत्ययानां नामार्थलिङ्गस्य द्योतकत्वात्। अन्यथा टाबादिप्रत्ययानां नामार्थलिङ्गस्य वाचकत्वे=द्योतकत्वाभावे सति टाबादिप्रत्ययानामभावे स्त्रीलिङ्गेभ्यः 'वाग्', 'उपानद्' इत्यादिभ्यः प्रयोगेभ्यः 'इयं तव वाग्', 'इयं तव उपानद्' एतत्प्रकारकस्य स्त्रीबोधस्य अनापत्तिः स्यात्। वैयाकरणनये 'अयम्' इति व्यवहारविषयत्वं पुंस्त्वम्, 'इयम्' इति व्यवहारविषयत्वं स्त्रीत्वं तथा 'इदम्' इति व्यवहारविषयत्वं नपुंसकत्वं वर्त्तते। तस्मादेव कारणात् खट्वादिशब्दवाच्यस्य स्तनकेशादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि स्त्रीलिङ्गेभ्यः खट्वादिशब्देभ्यः स्त्रीत्वद्योतनाय टाबादिप्रत्ययाः क्रियन्ते।

**संख्याया नामार्थत्वम्-** जातेः, व्यक्तेः लिङ्गस्य चाऽनन्तरम् एकवचनं, द्विवचनं बहुवचनञ्चापि संख्या नामार्थत्वेन स्वीक्रियन्ते, विभक्तीनां संख्याया द्योतकत्वात्। अत एव=विभक्तिसंज्ञकानां सुँप्तिङ्प्रत्ययानां द्योतकत्वादेव **"आदिर्ञिटुडवः"**[७] सूत्रेऽस्मिन् आदिरित्यत्र बहुत्वेऽर्थे एकवचनं 'सुँ' प्रत्ययो

---

[६] आकृतिः पदार्थो यस्येति आकृतिपदार्थकः (बहुव्रीहि-समासः), तस्य आकृतिपदार्थकस्य।

[७] पाणिनीय-अष्टाध्यायी-सूत्रक्रमाङ्कः- १/३/५

भवति। अन्यथा विभक्तिसंज्ञकानां सुँप्तिङ्प्रत्ययानां नामार्थसंख्याया द्योतकत्वाभावे अर्थात् वाचकत्वस्वीकारे अन्वयव्यतिरेकाभ्यां 'जस्' प्रत्ययस्य बहुत्वे वाच्यत्वे सति तं विना नामार्थ-बहुत्वप्रतीत्यभावेन तद्बोधाभावाद् बहुत्वबोधनाय आदिरित्यत्र बहुवचनं करणीयम्।

**कारकस्य नामार्थत्वम्-** कारकमपि पञ्चमनामार्थेन स्वीक्रियते। न च अन्वयव्यतिरेकाभ्यां कारकस्य प्रत्ययार्थवाच्यत्वम् अङ्गीकरणीयम्, 'दधि तिष्ठति', 'दधि पश्य' इत्यादौ प्रत्ययं विनापि कर्त्रादिकारकस्य बोधप्रसङ्गात्। न च लुप्तप्रत्ययस्मरणद्वारा कर्त्रादिकारकस्य जनेभ्यः प्रतीतिरिरिति वाच्यम्, ये जनाः प्रत्ययलोपं न जानन्ति तेषामपि प्रत्ययज्ञानं विना केवलं नामार्थेनैव कर्त्रादिकारकस्य प्रतीतिसम्भवात्।

**शब्दस्वरूपस्य नामार्थत्वम्-** विशेषणतया शब्दोऽपि शाब्दबोधे भासते, 'युधिष्ठिर आसीत्' इत्यादिवाक्येषु 'युधिष्ठिर'शब्दवाच्यः कश्चन आसीत् इति बोधात्। उक्तञ्चापि वाक्यपदीये-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।**[८]

अर्थात् संसारे किमपि ज्ञानम् एतादृशं नास्ति यत् शब्दज्ञानं विनैव भवितुं शक्नोति। सर्वविधं ज्ञानं शब्देन सह सम्बद्धं सम्भूय एव प्रकटितं भवति। एतदतिरिक्तम्-

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।**
**तथैव सर्वशब्दानाम् एते पृथग् अवस्थिते।।**[९]

अर्थात् यथा **तेजसः**=प्रकाशस्य **ग्राह्यता**=प्रकाश्यत्वं **ग्राहकत्वं**=प्रकाशकत्वं च द्वे शक्ती विद्येते, तथैव समेषां शब्दानाम् इमे द्वे शक्ती पृथक् पृथक् अवस्थिते वर्तेते। अर्थात् शब्दो बोध्योऽपि भवति बोधकोऽपि भवति। अथ च-

**विषयत्वम् अनादृत्य शब्दैर्नार्थः प्रकाश्यते।**[१०]

अर्थात् ज्ञानस्य विषयताम्=शब्दत्वम् अनादृत्य=अप्रकटीकृत्य शब्दद्वारा अर्थज्ञानं न भवति। शब्दानां स्वरूपमपि शब्दैः भासितं भवति, अत एव 'विष्णुम् उच्चारय' इत्यादिस्थलेषु अर्थस्य उच्चारणाऽसम्भवात् शब्दोच्चारणं क्रियते।

---

[८] वाक्यपदीये- १/१२३

[९] वाक्यपदीये- १/५५

[१०] वाक्यपदीये- १/५६

शाब्दबुद्धौ शब्दस्वरूपस्यापि भासितत्वाद् अनुकरणेन अनुकार्यस्वरूपस्य ज्ञानं भवति। तथाहि- अनुकरणस्य परिभाषायाम् अनुकरणसदृशस्य अर्थात् अनुकरणस्य इव वर्णानुपूर्विमतोऽनुकार्यभूतस्य शब्दस्य ज्ञानसम्पादनमेव प्रयोजनं यस्य, एतादृशस्य उच्चारणस्य विषयत्वम् अनुकरणत्वं भवति तथा च अनुकार्यस्य परिभाषायाम् अनुकार्यसदृशेन अर्थात् अनुकार्यस्य इव वर्णानुपूर्विमता अनुकरणभूतेन शब्देन अभिधीयमानशब्दसम्पादनत्वम् अनुकार्यत्वं भवति। यथा- **स्व-सदृश-शब्दमात्र-बोध-तात्पर्यकोच्चारण-विषयत्वम् अनुकरणत्वम्। स्व-सदृश-शब्द-प्रतिपाद्यत्वे सति शब्दत्वम् अनुकार्यत्वम्।**

अनुकरण-अनुकार्ययोर्मध्ये पक्षद्वयं वर्तते- १. भेदपक्षः २. अभेदपक्षश्च। तत्र भेदपक्षे अनुकार्यस्वरूपस्य प्रतिपादकत्वेन अनुकरणस्य अर्थवत्त्वात् तस्य प्रातिपदिकसंज्ञायां सञ्जातायां प्रातिपदिकादनुकरणात् स्वादिविधिर्भवति। भेदपक्षस्य बोधकाः **"भुवो वुग्लुङ्लिटोः"**[११] इत्यादिसूत्रेषु पठिताः 'भुवः' इत्यादयः षष्ठीनिर्दिष्टाः शब्दा वर्त्तन्ते। अनुकार्याद् अनुकरणम् अभिन्नम् इत्यभेदविवक्षायाम् अनुकरणस्य अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाभावान्नैव[१२] तस्मात् स्वाद्युत्पत्तिर्भवति नैव च तस्य पदसंज्ञा[१३] जायते। अभेदपक्षस्य ज्ञापकस्तु 'भू सत्तायाम्' इत्यादिषु 'भू' इत्यादिनिर्देशोऽस्ति। 'भू सत्तायाम्' इत्यत्र 'भू' इत्यस्य प्रातिपदिकसंज्ञाऽभावात् पदत्वाभावेऽपि शिष्टप्रयोगवशात् तस्य साधुत्वं ज्ञेयम्।

ननु 'अपदं न प्रयुञ्जीत' इति भाष्याद् 'भू सत्तायाम्' इत्यादिषु 'भू' इत्यादीनां प्रयोगोऽसाधुरिति चेन्न? 'अपदम्' इत्यस्य 'अपरिनिष्ठितम्' इत्यर्थात्। परिनिष्ठितत्वञ्च- **अप्रवृत्त-नित्य-विधि-उद्देश्यतावच्छेदकानाक्रान्तत्वम्।** अर्थात् अप्रवृत्तो यो नित्यविधिर्वर्त्तते तस्य उद्देश्यतावच्छेदकेन अनाक्रान्तत्वम्=यत्र अप्रवृत्तनित्यसूत्रस्य प्रवृत्तिर्भवितुं न शक्नोति अर्थात् अप्रवृत्तिस्थलम्=अनुदाहरणम् परिनिष्ठितम्=पदं भवति। अस्य पदकृत्यं यथा- 'देवदत्तो भवति' इत्यादौ **"तिङ्ङतिङः"**[१४] इति सूत्रेण अनुदात्तस्वरे सञ्जाते 'देवदत्तः' इति अतिङन्तात् परस्य 'भवति' इति तिङन्तस्य **"तिङ्ङतिङः"** इति सूत्रस्य उद्देश्यतावच्छेदकाक्रान्तत्वात्=उदाहरणत्वात् तत्र अपरिनिष्ठितत्ववारणाय परिनिष्ठितत्वपरिभाषायाम् 'अप्रवृत्त' इति पदं गृहीतम्। 'सेधिता' इत्यादिषु विकल्पेन इडागमविधायकेन **"स्वरति-सूति-सूयति-धूञूदितो वा"**[१५] इति सूत्रेण पाक्षिकप्रवृत्तिद्वारा इडागमे कृते पुनः 'सेद्धा' इत्यादौ

[११] पाणिनीय-अष्टाध्यायी-सूत्रक्रमाङ्कः- ६/४/८८

[१२] “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” अष्टाध्यायी, १/२/४५

[१३] सुँप्तिङन्तं पदम्- १/४/१४

[१४] पाणिनीय-अष्टाध्यायी-सूत्रक्रमाङ्कः- ८/१/२८

[१५] पाणिनीय-अष्टाध्यायी-सूत्रक्रमाङ्कः- ७/२/४४

**"स्वरति-सूति-सूयति-धूञूदितो वा"** इति विकल्पसूत्रस्य प्रवृत्तौ सत्यां तत्प्रवृत्तिवारणपूर्वक-परिनिष्ठितत्वसम्पादनाय परिनिष्ठितत्वपरिभाषायाम् 'नित्यविधिः' इति पदं स्वीकृतम्। अभेदपक्षे 'भू सत्तायाम्' इत्यादिस्थलेषु 'भू' इत्यादीनाम् **"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"** इति सूत्रस्य उद्देश्यतावच्छेदकानाक्रान्तत्वात् प्रातिपदिकसंज्ञाया अप्रवृत्तावपि विभक्तिरहितानां 'भू' इत्यादीनां साधुत्वसम्पादनाय परिनिष्ठितत्वलक्षणे 'उद्देश्यतावच्छेदकानाक्रान्तत्वम्' इति पदं अङ्गीकृतम्। एवम्प्रकारेण विभक्तिरहितानां 'भू' इत्यादीनां परिनिष्ठितत्वरूपं पदत्वं वर्त्तत एव। परिनिष्ठित-शब्दस्य पर्यायवाची शब्दो वर्त्तते साधुरिति।

न च अनुकरण-अनुकार्ययोर्मध्य अभेदविवक्षायाम् तयोः सर्वथाऽभेदत्वाद् अनुकरणभूते शब्दे अनुकार्यस्वरूपस्य बोधकत्वाभावाद् अनुकरणभूतेन शब्देन कथम् अनुकार्य-शब्दस्वरूपस्य ज्ञानं भवतीति वाच्यम्? सादृश्येति नामकेन सम्बन्धेन अनुकरणभूतस्य शब्दस्य अनुकार्य-शब्दस्वरूप-बोधकत्वाद् अर्थात् अनुकरण-अनुकार्ययोर्मध्ये 'वर्णाऽनुपूर्वी' इत्यादिरूपा या समानता वर्त्तते, यत् सादृश्यं वर्त्तते तेन कारणेन अनुकरणभूतः शब्दोऽनुकार्य-शब्द-स्वरूपस्य ज्ञानं कारयति। यथा सर्वतोभावेन मैत्र-सदृश-मूर्तिदर्शने मैत्रस्य स्मरणं भवति तथैव अनुकरण-शब्दे वाचकत्वाभावेऽपि 'भू' इत्याद्यनुकरणज्ञाने तादृश-अनुकार्यस्य ज्ञानं भवति।